सुभाषितेषु प्रथमाप्रयोगाः

# सुभाषितानि

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥

माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ॥

जनिता चोपनेता च यश्च विद्यां प्रयच्छति ।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥

राजपत्नी गुरोः पत्नी मित्रपत्नी तथैव च ।
पत्नीमाता स्वमाता च पञ्चैताः मातरः स्मृताः ॥

मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय खेदम् ।
कीर्तिं च दिक्षु वितनोति तनोति लक्ष्मीं
किं किं न साधयति कल्पलतेव विद्या ॥

न तातो न माता न बन्धुर्न दाता,
न पुत्रो न पुत्री न भृत्यो न भर्ता ।
न जाया न विद्या न वृत्तिर्ममैव
गतिस्त्वं गतिस्त्वं त्वमेका भवानि !

यत्र राजा स्वयं चौरः सामात्यः सपुरोहितः ।
तत्राहं किं करिष्यामि यथा राजा तथा प्रजाः ॥

नागुणी गुणिनं वेत्ति गुणी गुणिषु मत्सरी ।
गुणी च गुणरागी च विरलः सरलो जनः ॥

गर्जति शरदि न वर्षति, वर्षति वर्षासु निस्स्वनो मेघः ।
नीचो वदति न कुरुते, न वदति सुजनः करोत्येव ॥

धनवान् बलवान् लोके सर्वः सर्वत्र सर्वदा ।
प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते ॥

वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।
नद्यो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः प्लवङ्गमाः ॥

काकचेष्टो बकध्यानः श्वाननिद्रस्तथैव च ।
अल्पाहारी गृहत्यागी विद्यार्थी पञ्चलक्षणः ॥

◆◆◆

सुभाषितेषु द्वितीयाप्रयोगाः

## सुभाषितानि

विना वेदं विना गीतां विना रामायणीं कथाम् ।
विना कविं कालिदासं भारतं भारतं नहि ॥

यथा धेनुसहस्रेषु वत्सः प्राप्नोति मातरम् ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥

रङ्कं करोति राजानं राजानं रङ्कमेव च ।
धनिनं निर्धनं चैव निर्धनं धनिनं विधिः ॥

सन्तापयन्ति कमपथ्यभुजं न रोगाः
दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः ।
कं श्रीर्न दर्पयति कं न निहन्ति मृत्युः
कं स्त्रीकृता न विषयाः परिपीडयन्ति ॥

◆◆◆

सुभाषितेषु तृतीयाप्रयोगाः

# सुभाषितानि

मणिना वलयं वलयेन मणिर्मणिना वलयेन विभाति करः।
कविना च विभुर्विभुना च कविः कविना विभुना च विभाति सभा॥

शशिना च निशा निशया च शशी शशिना निशया च विभाति नभः।
पयसा कमलं कमलेन पयः पयसा कमलेन विभाति सरः॥

दुर्जनः परिहर्तव्यः विद्ययाऽलङ्कृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयङ्करः॥

क्षमया दयया प्रेम्णा सूनृतेनार्जवेन च।
वशीकुर्याज्जगत् सर्वं विनयेन च सेवया॥

मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत्।
मन्त्रवद्रक्षयेद् गूढं कार्ये चापि नियोजयेत्॥

एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना।
वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा॥

कर्मणा बाध्यते बुद्धिर्न बुद्ध्या कर्म बाध्यते।
सुबुद्धिरपि यद् रामो हैमं हरिणमन्वगात्॥

द्विषद्भिः शत्रुभिः कश्चित् कदाचित् पीड्यते न वा।
इन्द्रियैर्बाध्यते सर्वः सर्वत्र च सदैव च॥

◆◆◆

सुभाषितेषु चतुर्थीप्रयोगाः

# सुभाषितानि

विष्णवे जिष्णवे शङ्खिने चक्रिणे रुक्मिणीरागिणे जानकीजानये ।
वल्लवीवल्लभायार्चितायात्मने कंसविध्वंसिने वंशिने ते नमः ॥

नमो नलिननेत्राय वेणुवाद्यविनोदिने ।
राधाधरसुधापानशालिने वनमालिने ॥

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेछान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्त्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥

◆◆◆

# सुभाषितानि

युक्तियुक्तं वचो ग्राह्यं बालादपि शुकादपि ।
अयुक्तं नैव च ग्राह्यं साक्षादपि बृहस्पतेः ॥

राजतः सलिलादग्नेश्चोरतः स्वजनादपि ।
भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव ॥

अज्ञेभ्यो ग्रन्थिनः श्रेष्ठाः ग्रन्थिभ्यो धारिणो वराः ।
धारिभ्यः ज्ञानिनः श्रेष्ठाः ज्ञानिभ्यो व्यवसायिनः ॥

इतिहास-पुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदः मामयं प्रहरिष्यति ॥

◆◆◆

सुभाषितेषु षष्ठीप्रयोगाः

# सुभाषितानि

भारोऽविवेकिनः शास्त्रं भारो ज्ञानं च रागिणः।
अशान्तस्य मनो भारो भारोऽनात्मविदो वपुः॥

ताराणां भूषणं चन्द्रः नारीणां भूषणं पतिः।
पृथिव्याः भूषणं राजा विद्या सर्वस्य भूषणम्॥

नखिनां शस्त्रपाणीनां नदीनां शृङ्गिणां तथा।
विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च॥

विदुषां वदनाद् वाचः सहसा यान्ति नो बहिः।
याताश्चेन्न पराञ्चन्ति द्विरदानां रदा इव॥

मूर्खो हि जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः।
अशुभं वाक्यमादत्ते पुरीषमिव शूकरः॥

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥

◆◆◆

**सुभाषितेषु सप्तमीप्रयोगाः**

# सुभाषितानि

शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम् ॥

मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्।
मनस्यन्यद् वचस्यन्यद् कर्मण्यन्यद् दुरात्मनाम् ॥

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम्।
आपत्सु च महाशैलशिलासङ्घातकर्कशम् ॥

सम्पत्तौ च विपत्तौ च महतामेकरूपता।
उदये सविता रक्तो रक्तश्चास्तमये तथा ॥

यथा चित्तं तथा वाणी यथा वाणी तथा क्रिया।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥

अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा
मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
सदा पुण्याऽरण्ये शिव शिव शिवेति प्रलपतः ॥

सत्यं वाचि दृशि प्रसादपरता सर्वाशयाश्वासिनी
पाणौ दानविमुक्तिरात्मजननक्लेशान्तचिन्ता मतौ ।
संसक्ता हृदये दयैव दयिता काये परार्थोद्यमो
यस्यैकः पुरुषः स जीवति भवे भ्राम्यन्ति जीवाः परे ॥

◆◆◆

सुभाषितेषु सम्बोधनप्रयोगाः

# सुभाषितानि

देवि सुरेश्वरि भगवति गङ्गे त्रिभुवनतारिणि तरलतरङ्गे
शङ्करमौलिविहारिणि विमले मम मतिरास्तां तव पदकमले।
भो भुवनेश्वरि पुण्ये धन्ये देवि देवमयि मुनिवरवन्द्ये
गङ्गास्तवमिमममलं नित्यं पठति नरो यः स जयति सत्यम्॥

मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जलम्
भ्रातर्व्योम निबद्ध एष भवतामग्रे प्रणामाञ्जलिः।
युष्मत्सङ्गवशोपजातसुकृतोद्रेकस्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमा लीये परे ब्रह्मणि॥

◆◆◆